# MT

**2018 .... .... 1100** **Seat No.** ☐☐☐☐☐☐☐

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - II**

**Time : 3 Hours** **(Pages 11)** **Marks : 100**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

**प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४)** ४

| १ | | २ | | ३ | | ४ | | ५ | |
|---|---|---|---|---|---|---|---|---|---|
| |  | |  | | तिन्त्रिणी  | |  | |  |
| | | | | | | | | | |

**प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २)** २

१. ७२ - २. एकषष्टिः -
३. ३६ -

**प्र.१ इ) स्तम्भमेलनं कुरुत ।** २

| | अ | ब |
|---|---|---|
| १. | सपाद-पञ्चवादनम् | ०८:३५ |
| २. | विंशत्यधिक-पञ्चवादनम् | ०५:१५ |
| ३. | पञ्चविंशत्यधिक-त्रिवादनम् | ०५:२० |
| ४. | पञ्चत्रिंशदधिक-अष्टवादनम् | ०३:२५ |

**प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २)** २

[ ________ / सोमवासरः ] ← [ ह्यः / मङ्गलवासरः ] ← [ अद्य / ________ ] → [ ________ / गुरुवासरः ]

**प्र.१ उ) उदाहरणद्वयं लिखत । (६ तः ५)** ५

१. ह्रस्वस्वरौ -
२. उकारान्तस्य -
३. दन्त्यौ -
४. स्त्रीलिङ्गस्य -
५. प्रथमगणस्य धातू -
६. चतुर्थगणस्य धातू -

**द्वितीयः विभागः - गद्यम् ।**

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

मम वाक्यसमाप्तेः पूर्वमेव व्याघ्रस्य मनुष्यवाण्या भाषणेन मूर्च्छिता सा महिला 'भूतोऽयं भूत' ... इति उच्चैः आक्रोशन्ती भूमौ पतिता । मम पुत्रः राघुः अपि एकवारं पञ्जरसमीपम् आगत्य, ''आप्पा ! चायं पातुम् इच्छति किम् ?'' इति यदा पृष्टवान् तदा प्रेक्षकाः सम्भ्रान्ताः एव ।

रात्रौ दशवादने सर्कसक्रीडायाः प्रारम्भः जातः । द्वादशवादने क्रीडायाः चरमबिन्दुः समायातः-सहभोजनम् । प्रेक्षकाणाम् उत्कण्ठायाः पराकाष्ठा जाता । सेवकः मञ्चे त्रीणि आसनानि स्थापितवान् मध्यभागे च वर्तुलाकरं पीठम् । अहम् एकस्मिन् आसने उपावेशितः। अत्रान्तरे भल्लूकवेषधारी अब्दुलः तत्र प्राप्तः । गौः अपि मञ्चं समागता । ततः अस्माकं पुरतः खाद्यस्य योजना कृता । सहभोजनस्य प्रारम्भे जाते उत्तेजितैः प्रेक्षकैः आनन्देन तालिकावादनम् आरब्धम् । पूर्वमपि व्याघ्रभल्लूकौ मानुषौ एव । तथापि सा धेनुः ताभ्यां सह कार्यक्रमं कर्तुम् अभ्यस्ता आसीत् ।

**१. अवबोधनम् । (४ तः ३)**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

महिला मूर्च्छिता यतः .......

(अ) महिला ज्वरपीडिता ।

(ब) तस्याः पुरतः व्याघ्रः मनुष्यवाण्या अवदत् ।

**ख) कः कं वदति ।** १

चायं पातुम् इच्छति किम् ?

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

सर्कसक्रीडायाः प्रारम्भः कदा जातः ?

घ) **एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

२. **शब्दज्ञानम् । (३ तः २)**

क) **गद्यांशतः तुमन्त-अव्यये चित्वा लिखत ।** १

ख) **प्रश्ननिर्माणं कुरुत ।** १

गौः मञ्चं समागता ।

ग) **सन्धिविग्रहं कुरुत ।** १

भूतोऽयम् - ....... + ....... ।

३. **पृथक्करणम् ।** २

**क्रमेण योजयत ।**

(i) भल्लूकवेषधारिणः अब्दुलस्य आगमनम् ।

(ii) सर्कसक्रीडायाः प्रारम्भः ।

(iii) उत्तेजितैः प्रेक्षकैः तालिकावादनम् ।

(iv) पशूनां खाद्यस्य योजना ।

प्र.२ **आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

प्रथमः प्रसङ्गः । संन्यासार्थम् अनुमतिः प्राप्ता ।

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म ख्रिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत्। तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

१. **अवबोधनम् । ( ४ तः ३ )**

क) **उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

२) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान् । (गृहं / नदीं)

**ख) पूर्णवाक्येन उत्तरत ।** १
गुरुमुपगम्य शङ्करः किम् अधीतवान् ?

**ग) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १
शङ्करः अतीव प्रज्ञावान् बालकः ।

**घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?** १

**२. शब्दज्ञानम् । (३ तः २)**
**क) गद्यांशतः द्वे ल्यबन्त-अव्यये चित्वा लिखत ।** १

**ख) प्रश्ननिर्माणं कुरुत ।** १
माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म ।

**ग) मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| शङ्करः | चिन्तामग्ना |
| आर्याम्बा | दिवङ्गतः |
| | विरक्तः |

**३. पृथक्करणम् ।** २
**स्थानाधारेण शब्दपेटिकां पूरयत ।**
(कालडीग्रामः, केरलप्रदेशः, भारतदेशः, आलुवानगरम्)



**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१.

| | |
|---|---|
| (ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...) | |
| विश्वामित्रः - | कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ॥<br>कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ॥ |
| नदी (विपाट्) - | कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ? |
| विश्वामित्रः - | अयि मातः, विश्वामित्रोऽहम् । दूरतः आयातः रथैः शकटैः च । वयं सर्वे परतीरं गन्तुं समुत्सुकाः । |

२.

| | |
|---|---|
| कीर्तनकारः - | एवं विश्वामित्रः नद्यौ प्रीणयित्वा परतीरं गतवान् । अयि श्रोतारः इत्थं नद्यः मानवाः च परस्परं प्रीणयन्तः संस्कृतिं संवर्धितवन्तः ।<br>प्रवाहिता तरङ्गिणी संस्कृतिर्विकासिता ।<br>प्रमुदिताश्च मानवाः सरित्कृपासमुन्नताः ॥<br>नन्दिताः कृषीवलाः प्रफुल्लिता वसुन्धरा ।<br>अन्नदाननिर्भरा सस्यशामला धरा ॥<br>सेतुबन्धरोधितं नियन्त्रितं नदीजलम् ।<br>जनित्रमत्र चालितं जीवनं प्रकाशितम् ॥ |

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१) पशूनां सहभोजनसमये कः हास्यपूर्णः अनवस्थाप्रसङ्गः समुत्पन्नः ?
२) ज्ञानग्रहणविषये शङ्कराचार्याणां किं मतम् ?
३) संस्कृताध्ययनम् अन्यक्षेत्रेषु कथम् उपयुक्तम् ?

## तृतीयः विभागः - पद्यम् ।

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

> वृद्धोऽहं त्वं युवा धन्वी सरथः कवची शरी ।
> तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ॥
> तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः ।
> चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

जटायुः कथं व्रणान् चकार ?

**ख)** **विशेषणानि लिखत ।** १

जटायुः -

**ग)** **रेखाचित्रं पूरयत ।** २




**प्र.३ आ)** **पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते च तस्योपरि ।
आर्ये मुञ्च विषादमाशु कमले नाहं प्रकृत्या चला
चेत्थं वै गिरिजासमुद्रसुतयोः सम्भाषणं पातु वः ।।

**क)** **पूर्णवाक्येन उत्तरं लिखत ।** १

विष्णुः भिक्षुरूपेण कुत्र गच्छति ?

**ख)** **सन्धिविग्रहं कुरुत ।** १

चेत्थम् - ............... + ............... ।

**ग)** **माध्यमभाषया उत्तरत ।** २

'रामाभिषेके जलमाहरन्त्या...' अस्य श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत ।

**प्र.३ इ) पद्ये शुद्धे पूर्णे च लिखत । (क - ख तः १ तथा ग - घ तः १)** ६

१. **क.** रामाभिषेके ............... ठः ।।

**ख.** अयं ............... वा ।।

२. **ग.** वैद्यराज ............... च ।।

**घ.** राक्षसेभ्यः ............... पण्डितः ।।

**प्र.३ ई) माध्यमभाषया सरलार्थं लिखत । (४ तः ३)** ६

१. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।

२. सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।

३. आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।
४. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र. ४ अ) वाक्यरचनां कुरुत ।**

**क) धातूनाम् उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (५ तः ३)** ३

१. कुप् →
२. वि + रम् →
३. पत् →
४. कथ् →
५. रक्ष् →

**ख) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. भगवान् सुगतः तत्र अस्ति ।
२. पार्वती शङ्करस्य भार्या ।
३. आकाशे मेघः गर्जति ।
४. का शीतलवाहिनी गङ्गा ?

**प्र.४ आ) ५ / ७ वाक्यात्मकं निबन्धं अथवा संवादं लिखत । (३ तः१)** ५

(१) मम प्रियं पुस्तकम् (२) भारतीयं प्रसिद्धं स्थलम् (३) मम प्रिया भाषा

**अथवा**

(१) आपणसंवादः (२) रुग्णालयसंवादः (३) दूरवाणीसंवादः

प्र.४ इ) **निर्दिष्टां कृतीं कुरुत ।**

**मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत ।** ५

१. 


(मञ्जूषा : नृत्यति, पश्यति, शोभते, मुञ्चति, आश्रयते, चलति)

अथवा

प्र.४ इ) **संस्कृतानुवादं कुरुत । (८ तः ५)**

१. Sparrow sits on the branch of the tree.
२. Mother rolls the chapati.
३. Gardner collects flowers.
४. Please open that door.
५. A boy brings a flower.
६. Students read a treatise/book.
७. Grandmother lights a lamp.
८. Father returns from the office at 5 o'clock in the evening.

## पञ्चमः विभागः - भाषाभ्यासः ।

प्र.५ अ) **तालिकापूर्तिं कुरुत ।**

१. **नामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | अप्सरोभ्याम् | ............ | तृतीया |
| दयावतः | ............ | ............ | षष्ठी |
| ............ | दिग्भ्याम् | ............ | चतुर्थी |

२. **सर्वनामतालिका । (६ तः ४)** २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| ............ | आवयोः-नौ | ............ | षष्ठी |
| इयम् | ............ | ............ | प्रथमा |
| ............ | ............ | येषु | सप्तमी |

३. **क्रियापदतालिका । (६ तः ४)** २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|---|
| लट् | ............ | जीवतः | ............ | प्रथमः पुरुषः |
| लङ् | ............ | ............ | अभाषध्वम् | मध्यमः पुरुषः |
| लोट् | मुञ्चानि | ............ | ............ | उत्तमः पुरुषः |

४. **धातुसाधित-विशेषण- तालिका । (६ तः ४)** २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ/शानच् |
|---|---|---|---|---|
| प्रच्छ् - पृच्छ् (६ प.प.) | ............ | पृष्टवान् | ............ | पृच्छन् |
| रम् (१ आ.प.) | रतः | ............ | रन्तव्यः | ............ |
| कृ (८ उ. प.) | ............ | ............ | कार्यः | कुर्वाणः |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

**१) योग्यपर्यायं चित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३)** ३

१. तेन ............ प्रयोगः कृतः । (त्रिवारं / त्रीणि)
२. भोजने ............ रसेषु मधुरः रसः मम प्रियः । (षष्ठः / षट्सु)
३. दिनस्य ............ लोकयानम् आगच्छति । (नववारम् / नवदश)
४. भवने मम गृहं ............ तले वर्तते । (सप्तम् / सप्तमे)
५. पौषमासः संवत्सरस्यः ............ मासः । (दशः / दशमः)

**२) समासानां तालिकापूर्तिं कुरुत । (५ तः ३)** ३

| | समस्तपदम् | समासविग्रहः | समासनाम |
|---|---|---|---|
| १. | यथेच्छम् | ............ | अव्ययीभावः समासः |
| २. | शेगावस्थानकम् | शेगाव इति स्थानकम् । | ............ |
| ३. | जलदः | ............ | उपपद-तत्पुरुषः समासः |
| ४. | नीलकण्ठः | ............ | बहुव्रीहि-समासः |
| ५. | भुजगयमिताः | भुजगैः यमिताः । | ............ |

**३) समानार्थकशब्दान् / विरुद्धार्थकशब्दान् लिखत । (५ तः ३)** ३

१. शीघ्रम् - २. व्याघ्रः -
३. उत्सुकाः × ४. मखः -
५. समाप्य ×

**४) सूचनानुसारं कृतीः कुरुत । (५ तः ३)** ३

क. वैद्यः प्राणान् हरति । (वाक्यं लङ्लकारे परिवर्तयत ।)
ख. अपि भवती संस्कृतं पाठयति ? ('भवती' स्थाने 'त्वं' योजयत ।)
ग. सः महोदयम् उपगम्य वदति । (पूर्वकालवाचकं निष्कासयत ।)
घ. सः पठनार्थं गुरुमुपागच्छत् । (बहुवचनं कुरुत ।)
ङ. त्वत्समीपम् आगमिष्यामि । (लकारं लिखत ।)

**५) वाक्यं शुद्धं कुरुत । (५ तः ३)** ३

१. भवान् किं करोषि ?
२. शूरः रामः गच्छसि ।
३. निर्धनः पुरुषं तु मित्राणि अपि त्यजन्ति ।
४. एकं बालिका पाठं न अस्मरत् ।
५. भारतदेशे विशालाः अरण्यानि सन्ति ।

## षष्ठः विभागः - अपठितम् ।

**प्र.६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)**

एकस्मिन् नदीतटे जम्बूवृक्षः वर्तते। तस्मिन् कः अपि वानरः वसति। सः नित्यं मधुराणि जम्बूफलानि खादति। तस्यां नद्याम् एकः मकरः अपि वसति। सः वानरस्य मित्रं विद्यते। वानरः मकरायापि मधुराणि जम्बूफलानि यच्छति। क्वचित् मकरः अपि कपिं विहारार्थं पृष्ठे उपविश्य नद्यां तरति स्म। एकदा मकरः स्वभार्यायै मधुराणि जम्बूफलानि अनयत्। मकरस्य जाया फलानि अखादत्। ततः सा अचिन्तयत् 'यः प्रतिदिनं ईदृशानि मधुराणि फलानि भक्षयति तस्य हृदयं कीदृशं मधुरं भवेत् । अहं तत् केन प्रकारेण लभे' इति।

**१) एकवाक्येन उत्तरत ।** १

१. वानरः नित्यं किं खादति ?

**२) प्रातिपदिकं लिखत ।** १

१) भार्यायै - ...............

२) तस्मिन् - ...............

**३) माध्यमभाषया सरलार्थं लिखत ।** १

एकदा मकरः स्वभार्यायै मधुराणि जम्बूफलानि अनयत् ।

**४) कारकपरिचयं कुरुत ।** १

नद्याम् एकः मकरः अपि वसति।

**५) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यम् इति लिखत ।** १

पक्वानि - अपक्वानि फलानि जनेभ्यः रोचन्ते ।

**६) गद्यांशात् धातुसाधित-अव्ययं चित्वा लिखत ।** १

**प्र.६ आ) - १) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

विना वेदं विना गीतां विना रामायणीं कथाम् ।
विना कविं कालिदासं कीदृशी भारतीयता ।।

**क) एकवाक्येन उत्तरत। (२ तः १)** १

(१) कं विना न भारतीयता?

(२) कां विना न भारतीयता?

**ख) विरुद्धार्थकशब्दं लिखत ।** १

विना × ...............

**प्र.६ आ) - २) जालचित्रं पूरयत ।** २




**शुभं भवतु**